International Journal of Sanskrit Research 2021; 7(6): 181-184

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(6): 181-184
© 2021 IJSR
www.anantaajournal.com
Received: 15-07-2021
Accepted: 21-09-2021

**Dr. Indulekha AB**
Assistant Professor, Department of Sanskrit Vyakarana, Governmnt Sanskrit College, Thripunithura, Tripunithura, Kerala, India

**Corresponding Author:**
**Dr. Indulekha AB**
Assistant Professor, Department of Sanskrit Vyakarana, Governmnt Sanskrit College, Thripunithura, Tripunithura, Kerala, India

# ।।आयुर्वेदशास्त्रे चरकसंहिता इति ग्रन्थस्य प्राधान्यम्।।

**Dr. Indulekha AB**

## प्रस्तावना

संस्कृतभाषा भारतस्य सर्वासां भाषाणां जननी इति पण्डितमतम्। शब्दार्थयोः सहितः भावः साहित्यम् इति। संस्कृतसाहित्यम् अतिविशालं महत्वपूर्णं च भवति। एतत् साहित्यं लौकिकं, वैदिकम् इति द्विधा विभज्यते। वैदिकसाहित्ये चत्वारः वेदाः, वेदस्य शाखाः एवमेव - ब्राह्मणानि, आरण्यकानि, उपनिषदः, कल्पसूत्राणि, गृह्यसूत्राणि, शुल्बसूत्राणि, शिक्षा, व्याकरणं,निरूक्तं, छन्दः, ज्योतिषं, धनुर्वेदः,गान्धर्ववेदः, अर्थशास्त्रं, पुराणं, दर्शनानि च सन्ति। तेषु आयुर्विज्ञानसम्बन्द्धस्य आयुर्वेदस्य स्थानं महनीयं भवति। आयुर्वेदशास्त्रे रोगाः, तेषां निवारणमार्गाः च सविस्तरं वर्णयन्ति। रूजन्ती इति रोगाः(पा.सु.3.3.16)। आयुर्वेदशास्त्ररीत्या शरीरस्य लक्षणम् – इन्द्रिय सत्व आत्म संयोगः शरीरम् इति। शरीर मन संयोगः पुरुषः इति पुरूषस्य लक्षणम् उक्तम्। पुरुषाणां दुःखं भवति रोगः। दुःखं त्रिधा विभज्यते आधिभौतिकम्, आधिदैविकम्, आध्यात्मिकं च। सर्वेषां दुःखानां निवारणमार्गाः अस्मिन् शास्त्रे विशदयन्ति।

आयुः विदति इति आयुर्वेदः अथवा आयुरस्मिन् विद्यते अनेन वा इति आयुर्वेदः। भारतस्य अतिप्राचीन चिकित्सासम्प्रदायः भवति आयुर्वेदः। आयुः जीवितम् इति उच्यते। विद् ज्ञाने इति धातोः निष्पन्नः भवति वेदशब्दः। ज्ञानम् अथवा विज्ञानं भवति वेदस्य अर्थः। अतः आयुर्वेदः केवलं चिकित्सापद्धतिमात्रमेव न किन्तु सम्पूर्णजीवनस्य विज्ञानं भवति। शरीरस्य इन्द्रियाणां मनसः आत्मनश्च संयोगः आयुः अथवा जीवनम् इति। आत्मा इन्द्रियैः मनसा च सह शरीरम् अधितिष्ठति। यथा आत्मा शरीरे तिष्ठति तथा शरीरं जीवनरूपेण वर्तते,तस्य सर्वाणि अङ्गोपाङ्गानि क्रियाशीलानि तिष्ठति। किन्तु यदा आत्मा शरीरवत् विरम्यते तदा शरीरं मृतं जायते तस्य सर्वाणि कार्याणि विरामं च प्राप्नुवन्ति। शरीरस्य इन्द्रियाणां, मनसः,आत्मनश्च विषये आयुर्वेदःज्ञानं ददाति। आयुर्वेदः केवलं मानवीयं भैषज्यं नास्ति अपि तु हस्ति-अश्व-गवादीनां, पशुपक्षिणां, वृक्षलतादीनाम्, उद्भिजानां च भैषज्यं भवति। आयुर्वेदः प्रधानतया त्रिदोषसिद्धान्तान् अधिकृत्य तिष्ठति। अस्य शास्त्रस्य प्रमुखविषयः शरीरिणः आयुष्यचिन्ता च भवति। वात पित्त कफाः त्रिदोषशब्देन व्यवह्रियन्ते। अस्य शास्त्रानुसारेण शरीरं वात पित्त कफेषु आश्रिता, पञ्चभूतनिर्मितं च भवति। पृथ्वी, जलम्, अग्नि, वायुः, आकाशः इत्यादयः च भवति पञ्चभूताः। वाय्वात् आश्रित्य वातः, अग्न्यात् आश्रित्य पित्तः, पृथ्वी- जलम् एतेषाम् आश्रित्य कफः च प्रवर्तयति। शरीरस्य रिक्तस्थानात् आकाशं च। यत् शरीरात् त्रिदोषवैकृतत्वात् आयुष्यहानिकराः रोगाः जायन्ते। तेषां निदानम्, उपचारं च आयुर्वेदस्य प्रतिपाद्यम्।

आयुर्वेदः प्रारम्भिनकाले संयुक्तरूपेणैवासीत्। परवर्तिनकाले पठनप्रायोगिक परिज्ञानार्थम् आयुर्वेदः अष्टसु अङ्गेषु विभज्यते यथा–शल्यतन्त्रं, शालाक्यतन्त्रं, कायचिकित्सा, भूतविद्या, कौमारभृत्यम्, अगदतन्त्रम्, रसायनतन्त्रम्, वाजीकरणतन्त्रं च।

आयुर्वेदस्य एकैकाङ्गे केचनग्रन्थाः प्रामुख्यरूपेण वर्तन्ते। यथा – शल्यचिकित्साप्रधानं सुश्रुततन्त्रं, शालाक्यचिकित्साप्रधानं निमितन्त्रं, कायचिकित्साप्रधानं चरकसंहिता, कौमारभृत्यचिकित्साप्रधानं वृद्धजीवकीयम्, अगदतन्त्रप्रधाना काश्यपसंहिता, रसायनतन्त्रप्रधानं नागार्जुनतन्त्रं, वाजीकरणतन्त्रप्रधानं कुचुमारतन्त्रं च। आयुर्वेदस्य अद्य उपलभ्यमानौ प्रामाणिकग्रन्थौ स्तः बृहत्त्रयी, लघुत्रयी च।चरकेन प्रतिसंस्कृतः चरकसंहिता, सुश्रुतेन विरचिता सुश्रुतसंहिता, वाग्भटेन विरचितम् अष्टाङ्गहृदयं च बृहत्रयी इति नाम्ना व्यवह्रियते। लघुत्रयी इति नाम्ना व्यवह्रियमाण ग्रन्थाः यथा – माधवाचार्येण विरचितं माधवनिधानं, शार्ङगधरेन विरचिता शाङ्र्गधरसंहिता, भावमिश्रेण विरचित भावप्रकाशं च। एते ग्रन्थाः आयुर्वेदशास्त्रे अतीव प्राधान्यम् अर्हन्ति।

अष्टाङ्गयुक्तस्य आयुर्वेदस्य कायचिकित्साप्रधानग्रन्थः भवति चरकसंहिताः। चिञ् चयने इत्यस्मात् धातोः व्युत्पादितः कायशब्दः (अ.को.2.7.71) सम्पूर्णसंवर्धातुः काय इत्यर्थः। तत् एवं सर्वशरीरोपतापकराणाम् अपक्वाशयस्थानोद्भवानां ज्वररक्तपित्तातिसारादीनां रोगाणां यत्रोऽपशमोपायो निगद्यते तत् कायचिकित्सा नाम अङ्गम्। अस्यां संहितायाम् अष्टस्थानानि विंशत्युत्तर एकशत अध्यायाः च सन्ति। एतानि अष्टस्थानानि सूत्र-निदान- विमान-शरीर-इन्द्रियचिकित्सा कल्पसिद्धिस्थानानि च। तत्र त्रिंशदध्यायकं भवति सूत्रस्थानम्। अध्यायाष्टकं विमानस्थाने च सन्ति। अष्टशरीरस्थानानि द्वादशकमिन्द्रियाणां, त्रिंशकचिकित्सितानां, द्वादशकं कल्पसिद्धिस्थाने च प्रतिपादितानि।

सूत्रस्थाने प्रधानतया आयुर्वेदस्य मौलिकसिद्धान्तानां निरूपणं प्रतिपाद्यते। दीर्घञ्जीवितीयः, अपामार्गतण्डुलीयः, आरग्वधीयः, षड्विरेचनशताश्रितीयः, मात्राशितीयः, तस्याशितीयः, न वेगान्धारणीयः, इन्द्रियोपक्रमणीयः, खुड्डाकचतुष्पादः, महाचतुष्पादः तिस्त्रैषणीयः, वाताकलाकलीयः, स्नेहाध्यायः, स्वेदाध्यायः, उपकल्पनीयः, चिकित्साप्राभृतीयः, कियन्तः शिरसीयः, त्रिशोथीयाध्यायः, अष्टौदरीयाध्यायः, महारोगाध्यायः, अष्टौनिन्दितीयः, लङ्घनबृंहणीयः, संतर्पणीयः, विधीशोणितीयः, यज्जपुरूषीयः, आत्रेयभद्रकाप्यीयः, अन्नविधिः, विविधाशितपीतीयः, दशप्राणयतनीयः, अर्थदशमहामूलीयः, एवं त्रिंशदध्यायात्मकं भवति सूत्रस्थानम्। निदानस्थाने प्रधानतया निदानं, पूर्वरूपं, रूपं, संप्राप्तिः, उपशयानुपशयः इत्यादयः निदानपञ्चकस्य अथवा रोगनिदानस्य मौलिकसिद्धान्तत्वेन प्रतिपाद्यन्ते। ज्वरनिदानं, रक्तपित्तनिदानं, गुल्मनिदानं, प्रमेहनिदानं, कुष्टनिदानं, शोषनिदानम्, उन्मादनिदानम्, अपस्मारनिदानम् इति अष्टाध्यायाः भवन्ति निदानस्थानम्। विमानस्थाने प्रधानतया प्रमाणविज्ञानं प्रतिपादयति। रसविमानं, त्रिविधकुक्षीयं, जनपदोध्वंसनीयं, त्रिविधरोगविशेषविज्ञानीयं, स्त्रोतत्विमानं, रोगानीकविमानं, व्याधितम्पीयं, रोगाभिषग्जितीयम् इति अष्टाध्यायात्मिकं भवति विमानस्थानम्। शारीरस्थाने शरीरविज्ञानम् अधिकृत्य प्रतिपाद्यते। कतिधापूरूषीयः, अतुल्यगोत्रीयः, खुड्डिकागर्भवक्रान्तिः, महतीगर्भावक्रान्तिः, पुरूषविचयः, शरीरविचयः, शरीरसंख्याः, जातिसूत्रीयः इति अष्टाध्यायात्मिकं भवति शारीरस्थानम्। इन्द्रियस्थाने अरिष्टस्थाम् अधिकृत्य विस्तृतवर्णनं क्रियते। वर्णस्वरीयः, पुष्पितकः,परिमर्शनीयः, इन्द्रियानीकः, पूर्वरूपीयः, कतमानि शारीरियः, पन्नरूपीयः, अवाक्शिरसीयः, यस्य श्यावनिमितीयः, सद्योमरणीयः, अणुज्योतीयः, गोमयचूर्णीयः इति द्वादशध्यायात्मकं भवति इन्द्रियस्थानम्। चिकित्सास्थाने चिकित्साम् अधिकृत्य विवरणं लभ्यते। रसायनं, वाजीकरणं, ज्वरः इत्यादयः रोगाः अस्मिन् स्थाने प्रतिपादयन्ति। वाजीकरणं, ज्वरचिकित्सा, रक्तपित्तचिकित्सा, गुल्मचिकित्सा, प्रमेहचिकित्सा, कुष्ठचिकित्सा, राजयक्ष्माचिकित्सा, उन्मादचिकित्सा, अपस्मारचिकित्सा, क्षतक्षीणचिकित्सा, श्वयथुचिकित्सा, उदरचिकित्सा, अर्शचिकित्सा, ग्रहणीदोषचिकित्सा, पाण्डुरोगचिकित्सा, हिक्का श्वास चिकित्सा, अतिसार चिकित्सा, छर्दिचिकित्सा, विससर्पचिकित्सा, तृष्णाचिकित्सा, विषचिकित्सा, मदात्ययचिकित्सा, द्विव्रणीयचिकित्सा, त्रिमर्मीयचिकित्सा, उरूस्तम्भ चिकित्सा, वातव्याधिचिकित्सा, वातशोणितचिकित्सा, योनिव्यापत् चिकित्सा इति त्रिंशतध्यायात्मकं भवति चिकित्सास्थानम्। कल्पस्थाने भैषज्यकल्पनं सविस्तरं प्रतिपादयति। मदनकल्पः, जीमूतकल्पः, इक्ष्वाकूकल्पः, धामार्गकल्पः, वत्सककल्पः, कृतवेधनकल्पः, श्यामात्रिवृत्कल्पः, चतुराङ्गुलकल्पः, तिल्वककल्पः, सुधाकल्पः, सप्तलाशंखिनीकल्पः, दन्ती-द्रवन्तीकल्पः इति द्वादशध्यायात्मकं भवति कल्पस्थानम्। अन्तिमे सिद्धिस्थाने संशोधनचिकित्सां च प्रतिपादयति। कल्पनासिद्धिः, पञ्चकर्मीयाः, वस्तिसूत्रीया, स्नेहव्यापात्, नेत्रवस्तिव्यापत्, वमन विरेचन व्यापत्, निरूहहवस्तिव्यापत्, प्राकृतयोगीया सिद्धिः, त्रिमर्मीय सिद्धिः, वस्ति सिद्धिः,फलमात्रा सिद्धिः, उत्तरवस्ति सिद्धिः इति द्वादशाध्यायात्मकं भवति सिद्धिस्थानम्।

**चरकसंहितायाः कर्तारः।**

शरीरमानसभैषज्यम् उपादाय कायचिकित्साप्रधाना वर्तमानकाले प्रसिद्धा चरकसंहिता अनेकपरिवर्तनात् अनन्तरमेव उपलब्धा। सेयं संहिता भगवता आत्रेयपुनर्वसुना उपदिष्टा, तत् शिष्येण अग्निवशेन प्रणीता, चरकदृढबलाभ्यां प्रतिसंस्कृतम् इति। चरकसंहितायां सूत्रस्थाने दीर्घञ्जीवितीयं नामके प्रथमे अध्याये आयुर्वेदावतरणवृतान्ते अग्निवेशभेलादीनां गुरूः, भरद्वाजस्य शिष्यः भवति अयम् आत्रेयः इति प्रस्तावयति। चन्द्रभागिनः इति पुनर्वसुरात्रेयस्य अपरनामधेयम् इति चरकसुश्रुतयोः

स्वस्वग्रन्थेषु सूचयति (च.सू.पृ.3)। चरकसंहितागतेन उल्लेखेन काम्पिल्य राजधान्यां पाञ्चाल प्रदेशे जीवितः पुर्वसुरात्रेय आचार्य इति अवगम्यते। केषाञ्चित् पण्डितानां मते पुनर्वसोः आविर्भावकालः त्रिसहस्रवत्सरात् अर्वाङ्नायाति (च.सू.पृ.6)। आत्रेयशिष्येण अग्निवेशेन अग्निवेशतन्त्रं रचितं तस्यापि स एव समयः। पुनर्वसुरात्रेयस्य शिष्यः भवति अग्निवेशः। आत्रेयः अस्मिन् आयुर्वेदप्रस्थाने परमाचार्यः भवति। सः अग्निवेशः, भेलः, जतुकर्णः, पराशरः, हारीतः, क्षारपाणि इत्यादिभ्यः षट्भ्यः शिष्येभ्यः आयुर्वेदं दत्तवान्। शिष्याः स्वकीयाविचारयुक्तिभिः संहितां व्यरचयत्। तेषु अग्निवेशस्य तन्त्रम् अतिविशिष्टम् इति सर्वैः अङ्गीक्रियते अनन्तरं तन्त्रमिदं चरकाचार्येण संस्कृतं सर्वदा प्रसिद्धं च भवति।

आत्रेयपुनर्वसूपदेशात् निबद्धायाः अग्निवेशसंहितायाः पश्चात् भाष्यं संग्रहश्च लिखितः चरकाचार्यः कः, तस्य कालः कः इत्यादि विषयान् अधिकृय अनेके पण्डिताः विविधप्रकारेण अभिप्रयन्ति। प्रथमशताब्दे जीवितवतः कनिष्कनृपतेः राजकुलवैद्यः भवति चरकः इति विविधचरित्रकाराः अभिप्रयन्ति। बौद्धमतानुयायी भवति कनिष्कः, यथा चरकः शल्यशास्त्रं त्यक्त्वा कायचिकित्साप्रधानग्रन्थम निर्मितवान् इति पण्डितमतम्। कठचरकाल्लुक् (पा.सू. 4.3.107) इति सूत्रे चरकशब्दस्य निर्देशात् चरकाचार्यः पाणिनेः पूर्वं जीवितवान् इति। किन्तु अस्मिन् सूत्रे निर्दिष्टचरकः कठसाहचर्याञ्चारणव्यूहोक्तिसंवादाञ्च संहितादृष्टा, किं वा सः सांप्रदायिकोऽन्यः एव प्राचीनो महर्षिः इति निश्चीयते। माणवकचरकाभ्यां खञ् (पा.सु. 5.1.111) इति सूत्रान्तरे उपात्तचरकशब्दः अपि त्रित्वस्य स्वरार्थतया निर्देशेन स्वरस्य विशेषतो वैदिकीषु प्रक्रियासू उपयोगाञ्च लौकिकैकचरकव्यक्तिपरत्वकल्पनापेक्षया चरकशाखीयपरत्वमेव कल्पयितुम् उचितः प्रतिभाति। चर गतौ इति धातोः (पा.सु.3.3.134) निष्पन्नं भवति चरकशब्दः अतः सञ्चरणशीलभिक्षुरूपार्थम् आदाय चरकनाम्ना प्रसिद्धः स्यात् इत्यपि केषाञ्चन मतम्। वैयाकरणमहाभाष्यकारः पतञ्जलिः अग्निवेशतन्त्रं स्वीकृत्यः तस्य समानं पाताञ्जलमहाभाष्यस्य चरकप्रतिसंस्कृतैः इति चक्रपाणिदत्तस्य उक्तिं (च.सं. मङ्गलाचरणम्) च प्रमाणीकृत्य पण्डिताः समर्थयति। किन्तु केषाञ्चन पण्डिताः तयोः अनैक्यमपि प्रतिपादयन्ति। यथा पतञ्जलिः यदि इह पुष्यमित्रं याजयाम (संस्कृतव्याकरणशास्त्रेतिहासविमर्शः पृ.81) इत्यस्य वाक्यस्य प्रामाणिकत्वात् पुष्यमित्रस्य कालात् शताधिकद्विसहस्रवत्सरात् पूर्वमासीत् इति निश्चीयते। चरकस्य प्राचीनत्वचिन्तने, त्रिपिटिकलेखमात्रेण कनिष्कसामयिकास्वीकारे तु कनिष्कपुष्यमित्रसामयिकयोः द्वित्रिशतवर्षान्तरितयोः चरकपतञ्जलयाचार्ययोः एकव्यक्तित्वकल्पना प्रतिहन्यते।

आयुर्वेदशास्त्रीयग्रन्थेषु कायचिकित्सार्थे चरकसंहितायाः महत्वं विद्यते। अस्य ग्रन्थस्य वैशिष्टयस्ति यत् अनेकाः टीकाः अस्मिन् ग्रन्थे टीकाकारैः रचिताः। अद्यावधि चरकसंहितायाः यासां टीकानां निर्देशः प्राप्यते तासामुल्लेखः अधस्तात् क्रियते। यथा महाभाष्यकारपतञ्जलिविरचित पातञ्जलवार्तिकम् नान्नी टीका, जोज्जटेन विरचिता निरन्तर पदव्याख्या नान्नी टीका, अमृतप्रभेण कृता चरकन्यास नान्नी टीका, नरदत्तेन कृता बृहतन्त्रप्रदीप टीका, श्रीकृष्णवैद्येन प्रणीता चरकभाष्यं नान्नी टीका, वाच्यचन्द्रेण विरचिता वाच्यचन्द्रतन्त्रटीका, गुणकरेण विरचिता चरकवृत्तीटीका, गंगाधरकविविरजेन विरचिता जपकल्पतरूटीका, यैगीन्द्रनाथसेनेन विरचिता चरकोपस्कारटीका, एकादशशताब्द्यां चक्रपाणिदत्तेन चरकसंहितामवलम्ब्य विरचिता आयुर्वेददीपिकाटीका। इयं टीका अद्यापि समुपलभ्यते। अस्य योग्यतया अभिभूतैः विद्वद्भिरस्मै चरकचतुराननेति पदवीं प्रदत्ता।

### उपसंहारः

भारतस्य प्राचीनतमचिकित्साविज्ञानं भवति आयुर्वेदः।आयुर्वेदस्य लक्ष्यं प्रधानतया मनुष्यस्य स्वास्थ्यरक्षणं सौख्यरक्षणं च भवतः। आयुर्वेदीयाः औषधयः सुलभाः अल्पमूल्याः दोषरहिताः जनसाधारणप्रयोज्याश्च भवन्ति। आयुर्वेदचिकित्सया अपि अन्यः कोऽपि दोषः अथवा विकारो नैव सम्भवति। अतः आयुर्वेदः एका सम्यक् चिकित्सापद्धतिः भवति। आयुर्वेदः प्रधानतया त्रिदोषसिद्धान्तमधिकृत्य तिष्ठति। वात-पित्त-कफाः त्रिदोषशब्देन व्यवह्रियन्ते। आयुर्वेदः अथर्ववेदस्य उपवेदः इति केचन पण्डिताः स्थापयन्ति। तत् प्रमाणीकृत्य आयुर्वेदस्य कालः वैदिककालः इति सर्वैः अङ्गीक्रियते। वेदकालात् आविर्भूतमिदं शास्त्रं विविधैः परिवर्तनैः सह अद्य दृश्यमानेन संहिताग्रन्थरूपेण उपलभ्यते। चरकेण प्रतिसंस्कृता चरकसंहिता चरकसंहिता, सुश्रुतेन विरचिता सुश्रुतसंहिता, वाग्भटेन विरचितम् अष्टाङ्गहृदयं, माधवाचार्येण विरचितं माधवनिधानं, शाङ्र्गधरस्य शाङ्र्धरसंहिता,भावमिश्रस्य भावप्रकाशं च आयुर्वेदस्य अद्य उपलभ्यमानाः प्रामाणिकग्रन्थाः भवन्ति। एते ग्रन्थाः आयुर्वेदशास्त्रे अतीव प्राधान्यम् अर्हन्ति। अद्यतनकाले आयुर्वेदस्य द्विप्रकारेणैव प्रचारः वर्तते। शल्याङ्गप्रधानः आयुर्वेदः धन्वन्तरिपरम्पदया, कायचिकित्साप्रधानः आयुर्वेदः भारद्वाजपरम्परया च। एतयोः विभागयोः कायचिकित्साप्रधानः अतिप्राचीनग्रन्थः भवति चरकसंहिता।

### सन्दर्भ सूची

1. अमरकोशः – अमरसिंहविरचितः। (श्रीभानुदीक्षितकृतया सुधा ख्यया रामाश्रमी त्यपरनामधेयया व्याख्यया सहितः) संस्कर्ता- पण्डित शिवदत्तदाधिमथः। संशोधकः-वासुदेव लक्ष्मणशास्त्री, प्रकाशकः- चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्लि, पुनर्मुद्रितसमस्करणम्-2007.

2. आयुर्वेद का प्रामाणिक इतिहासः – लेखक-डाँ. भागवतराम गुप्त, कृष्णदास अकादमी, वाराणसी,प्रथम संस्करण, 1997.
3. आयुर्विज्ञानरत्नाकरः श्री योगेन्द्रनाथ। प्रकाशकः – राष्ट्रियसंस्कृतसंस्थान् नवदिल्ली।
4. चरकसंहिता- (वैद्यमनोरमा हिन्दी व्याख्या सहिता)- व्याख्याकारः- आचार्य विद्याधर शुक्ल, प्रो. रविदत्त त्रिपाठी, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 2002.
5. संक्षिप्तचरकसंहिता-लेखकः- डाँ एस.वि.शुक्ला। प्रकाशकः - चोखम्बा ओरियन्टालिया, वाराणसी, चतुर्थ संस्करणम्।